# A-I/1/2315/ 21

**द्वितीयसत्रार्द्धम्**

**प्रथमपत्रम्**

**मीमांसा**

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. नवमाध्यायस्य विचारविषयः कः?
2. नवमेऽध्याये कति पादाः?
3. ऊहस्य त्रयः प्रकाराः के?
4. प्रोक्षणादीनां धर्माणां व्रीह्यादिस्वरूपं प्रयोजकमपूर्वं वा?

**अथवा**

अगन्म सुवः सुवरगन्मेति मन्त्रः किं प्रकाशयति?

5. त्सरा वा एषा यज्ञस्य इति वाक्ये त्सराशब्दस्य कोऽर्थः?

**अथवा**

"त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" इति वाक्यस्य कोऽर्थः?

6. अन्वारम्भणीयेष्टिः कस्य अङ्गम्?
7. सौर्ये अग्नये जुष्टं निर्वपामि इति मन्त्रस्य कथमूहः?
8. साद्यस्के सोमक्रयसाधनं किम्?
9. न गिरा गिरेत्यादिवाक्यं तदर्थं च लिखत।
10. कतिषु ऋक्षु एकं साम गीयते?
11. ऋक्सामयोः कस्य प्राधान्यं कस्य गुणत्वम्?
12. अभ्युदितेष्टौ दधिशृतयोः प्रदेयधर्माः कार्या न वा?

**अथवा**

का नाम वङ्क्रयः?

13. एकवचनान्तपदघटितः पाशमन्त्रः कः?

14. मौद्गे चरौ बर्हींषि कथं भवन्ति ?

**अथवा**

समिदधादिपदं गुणविधिः कर्मनाम वा ?

15. रथन्तरधर्मः कः ?

**अथवा**

बृहतो धर्मः कः ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. अङ्गानामपूर्वप्रयुक्तत्वं विचारयत।

17. ऊहग्रन्थस्य पौरुषेयत्वं साधयत।

18. आरम्भणीयेष्टिः प्रतिदर्शपूर्णमासप्रयोगं कार्या न वेति विचारयत।

**अथवा**

देवस्यत्वेत्यादिनिर्वापमन्त्रे केषु पदेषु ऊहः न क्व चोह इति विचारयत।

19. स्तोभलक्षणं निरूपयत।

**अथवा**

ऊहस्य त्रैविध्यं सोदाहरणं दर्शयत।

20. पाराधिकरणमारचयत।

**अथवा**

अध्रिगुषैणे उरूकपदेन किमभिधीयत इति विचारयत।

**स. निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. ऊहलक्षणं सोदाहरणं दलकृत्यनिरूपणपुरस्सरं प्रतिपादयत।

**अथवा**

देवताया विग्रहादिमत्त्वमस्ति न वेति विचारयत।

**अथवा**

षड्विंशतिरस्य वङ्क्रय इति मन्त्रस्य पशुगणे कथमूह इति विचारयत।

# A-I/2/2316/ 21

## द्वितीयसत्रार्द्धम्

## द्वितीयपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. प्रसङ्गस्य किं लक्षणम्?
2. पञ्च प्रयाजाः के?
3. पौर्णमास्यां के प्रधानयागाः?
4. तन्त्रेणानुष्ठाने तन्त्रिणामुद्देश्यत्वमस्ति न वा?
5. बहुवचनं कुत्र पर्यवस्यति? किं प्रमाणम्?
6. वाजपेयस्य किं फलम्? तत्र वचनं किम्?
7. चातुर्मास्यविधायकं वाक्यं किम्?
8. वेद-वेदिकरणयोर्मध्ये क्रमबोधकं वचनं किम्?
9. नित्यधार्यः श्रौताग्निः कः?
10. राजसूयविधायकं वाक्यं किम्? तस्य किं फलम्?
11. द्वादशाहे कति सोमयागाः सन्ति?

**अथवा**

कर्मकाले अनध्यायेऽपि मन्त्राणां प्रयोगः अस्ति न वा?

12. होमानां प्रकृतिः का?

**अथवा**

वसोर्धारायां कर्मसन्निपातः कदा?

13. मासाग्निहोत्रस्य कर्मभेदबोधकं प्रमाणं किम्?

**अथवा**

किं नाम दानम्?

14. किं नाम प्रतिपत्तिकर्म ?

**अथवा**

किं नाम संयोगपृथक्त्वम् ?

15. निशियज्ञः कस्मिन्काले विहितः ?

**अथवा**

यागे आर्त्विज्यं कस्य ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. आग्नेयादीनां षण्णां तन्त्रेण फलार्थत्वं ग्रन्थोक्तदिशा विवृणुत।

17. काम्यकर्मणां भूयोऽभ्यासमाक्षिप्य यथाग्रन्थं समाधत्त।

**अथवा**

पूर्वपक्षसिद्धान्ताभ्यां कपिञ्जलाधिकरणं विवृणुत।

18. आग्नेयादीनां प्रधानानां तन्त्रानुष्ठानं विवृणुत।

**अथवा**

यज्ञपात्रेषु तन्त्रं प्रवर्तते न वेति ग्रन्थोक्तदिशा विवृणुत।

19. द्वादशाहे दीक्षोपसत्सुत्यानां तन्त्रमस्ति न वेति यथाग्रन्थं लिखत।

**अथवा**

पश्वर्थप्रयाजैः पुरोडाशस्य उपकारः प्रसङ्गात्सिध्यतीति ग्रन्थोक्तदिशा अनुवदत।

20. विहाराग्नेः वैदिककर्ममात्रार्थत्वं निरूप्य जपस्तुत्याशीरभिधानानां मन्त्राणां समुच्चयं यथाग्रन्थं निरूपयत।

**स. एकस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. धर्मप्रमाणानि।

**अथवा**

अर्थवादः।

**अथवा**

पर्युदासः।

# A-I/3/2317/ 21

## द्वितीयसत्रार्द्धम्

## तृतीयपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. किं नाम वार्त्तिकम् ?
2. धर्मजिज्ञासां प्रत्यधिकारी कः ?
3. प्राशस्त्यज्ञानस्य फलं किम् ?
4. शास्त्रविरोधमुदाहरत।
5. अर्थवादभेदान् विवृणुत।

**अथवा**

आर्थीभावनां व्याख्यात।

6. वायव्यायागसन्निधौ कः अर्थवादः श्रूयते ?
7. अध्ययनविधेः प्रतिज्ञा का ?
8. 'तुल्यं च साम्प्रदायिकम्' सूत्रार्थं वर्णयत।

**अथवा**

के कीकटाः ?

9. किं नाम पदैकवाक्यत्वम् ?
10. बर्हिषिरजतदानं कुतो न ?

**अथवा**

किं नाम प्रामाण्यम् ?

11. विधिवन्निगदाधिकरणे कः संशयः ?
12. कः पञ्चमलकारः तस्य निर्णयः अर्थश्च कः ?

**अथवा**

हि पदार्थः लोके कस्मिन्नर्थे प्रसिद्धः ?

13. मन्त्राणामर्थवत्वं कथम्?

14. अध्ययनपदार्थः कः?

15. अनारभ्यविधिमुदाहृत्य लक्षणेन समन्वयं कुरुत।

**अथवा**

परिसंख्यां व्याख्यात।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. अर्थवादाधिकरणे पूर्वपदस्य प्रथमसूत्रं वर्णयत।

17. वायव्यादिविधिवाक्ये वाक्यभेदाशङ्का परिहारश्च व्याख्येयः।

**अथवा**

'अर्के चेन्मधु विन्देत' इति न्यायं सप्रसङ्गं विवृणुत।

18. विधेः त्रैविध्यं व्याख्यात।

**अथवा**

अन्नहेतुत्वेन स्तुतित्वमेव वरमिति कः आशयः? स्पष्टयत।

19. विधित्रयं तेषामुदाहरणं च व्याख्यात।

**अथवा**

तां चतुर्भिः. . . . .इत्यादिमन्त्रार्थं यथाग्रन्थं विवृणुत।

20. भावनां तस्याश्च भेदान् विवृणुत।

**स. एकस्य विवरणात्मकमुत्तरं लिखत।** **(1×20=20)**

21. 'अर्थवादाः धर्मप्रभाजनकाः' इमं सिद्धान्तं समर्थयत।

**अथवा**

'शूर्पेण जुहोति तेन ह्यन्नं क्रियते इमं विषयवाक्यार्थं यथाग्रन्थं विवेचयत।

**अथवा**

'विवक्षितवचनाः मन्त्राः' इति साधयत।

# A-I/4/2318/ 21

## द्वितीयसत्रार्द्धम्

## चतुर्थपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. शून्यवादिनो मते नीलाद्याकारो बाह्यवस्तुन उत ज्ञानस्य?
2. शून्यवादिमते नक्षत्रं तारका तिष्य इति परस्परविरुद्धलिङ्गप्रतीति: कथम्?
3. सिद्धान्ते नीलाद्याकार: कस्य?
4. सिद्धान्ते ज्ञानं साकारं निराकारं वा?
5. शून्यवादिमते ज्ञानस्य तत्तदाकारतायां को हेतु:?
6. सिद्धान्ते ज्ञानस्य तत्तद्विषयकत्वे किं नियामकम्?
7. अनुमानस्य किं लक्षणम्?
8. व्याप्यव्यापकयो: किं गम्यं किं च गमकम्?
9. श्लोकवार्तिके कानि प्रमाणानि व्याख्यातानि?
10. चित्रया यजेत पशुकाम इति वाक्यस्य प्रामाण्यं कथमाक्षिप्तम्?

**अथवा**

शब्दार्थयो: संयोगलक्षणसम्बन्ध: कथं न सम्भवति?

11. गौरित्यत्र क: शब्द:?

**अथवा**

स्फोट: कै: स्वीक्रियते?

12. शब्दस्य अभिव्यक्ति: कथं भवति?

**अथवा**

ककारादौ कत्वादिजातिरस्ति न वा?

13. कथमयुगपद्भाविनां गकारादिवर्णानां गोत्वादिवाचित्वम्?

**अथवा**

वैयाकरणै: किमर्थं स्फोट: कल्प्यते?

14. गौरित्यत्र त्रिष्वपि वर्णेषु एकपदत्वबुद्धिः कथं भवति ?

**अथवा**

अर्थापत्तिमुदाहरत।

15. उपमानमुदाहरत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. शून्यवादपूर्वपक्षं संगृह्णीत।

**अथवा**

आकारस्य बाह्यार्थवृत्तित्वं साधयत।

17. अनुमानं ज्ञातसम्बन्धस्य एकदेशदर्शनादेकदेशान्तरे असन्निकृष्टेऽर्थे बुद्धिरिति वाक्यं यथावार्तिकं व्याख्यात।

**अथवा**

उपमितिस्वरूपं वर्णयत।

18. अनुमानेन शाब्दज्ञानानुत्पत्तिं प्रतिपादयत।

**अथवा**

शब्दादर्थबोधप्रकारं दर्शयत।

19. चित्राक्षेपवादं दर्शयत।

20. शब्दार्थयोः कः सम्बन्ध इति विचारयत।

**स. निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. अनुमानं समासतो निरूपयत।

**अथवा**

अभावप्रमाणं प्रतिपादयत।

**अथवा**

स्फोटवादसारं संगृह्णीत।